भौतिकदेहे मनसः स्थानम्

भेलाचार्याणां सिद्धान्तः प्रक्रियाश्च, विविधाचार्याणां तत्र विप्रतिपत्तिः समन्वयश्च

Narayan Baban Shete

Application Number: - CVV-3-2021/0099

इदं हि प्रख्यातमस्ति भारतीयज्ञानपरम्परायाम् अस्ति मनसः स्थानं महत्वपूर्णम्। "मनो दशेन्द्रियाध्यक्षम्" इदं मनः नियामकमिन्द्रियाणाम्। न केवलम् आयुर्वेदे अपि तु दार्शनिकपरम्परायामपि मनसः विषये बहुकिञ्चिच्चिन्तनं विद्वद्भिः कृतमस्ति। तस्मादेव जगति सकले उच्चस्थानम् अभूदायुर्वेदस्य योगशास्त्रस्य च। तन्मनः एव यस्य संयमार्थं यतन्ते सर्वे जनाः। तस्य एव आधारेण लोकाः यशःशिखराणि आरूढाः तस्यैव अनियमनात् जगति कतिपयाः पतिताः। ईदृशस्य मनसः आरोग्यार्थं स्वतन्त्रस्य शास्त्रस्य चिकित्सापद्धत्याः आवश्यकता अस्ति इति विद्वद्भिः अवगतं तत एव आधुनिकमानसशास्त्रस्य उदयः जातः।

समस्या –

मनसः आरोग्यार्थम् आयुर्वेदे अपि अस्ति काचिद्व्यवस्था किन्तु न तस्याः स्वतन्त्रशास्त्ररूपेण ग्रहणं क्रियते। तत्र मनसः विभिन्नानां प्रमादानां चिन्ता कृता अस्ति। प्रायः अद्यतनायुर्वेदाध्येतृभिः न तत्र अधिकम् अवधानं क्रियते इति भाति, यथा आधुनिकमानसशास्त्रे। यदाधुनिकं मानसशास्त्रम् अस्ति तेन कृतं बहुसाधुकार्यं यद्यपि तस्मिन्विषये तथापि सन्ति तत्र केचन प्रमादाः येषां न अद्यापि कारणानि प्राप्तानि न च तेषाम् उपायाः। अयुर्वेदे प्रायः चरकसंहितायाः सुश्रुतसंहितायाः अष्टाङ्गहृदयस्य च नाम अग्रे आगच्छति, किन्तु सन्ति तत्र अन्येऽपि ग्रन्थाः तेषु अन्यतमः भेलसंहिता भेलाचार्याणाम्। तस्याम् भेलाचार्येण चिकित्सास्थाने अष्टमाध्याये मनसः स्थानविषये विवरणं कृतमस्ति। उक्तं तेन यन्मनसः स्थानं शिरस्तालवन्तरगतम् अस्ति, "शिरस्तालवान्तरगतं सर्वेन्द्रियपरं मनः"[1] इति।

इदं प्रसिद्धमस्ति यद्भारतीयदर्शनादिपरम्परायां मनसः स्थानं हृदयम् उच्यते, न तु शिरः "मनोदशेन्द्रियाध्यक्षं हृत्पद्मगोलके स्थितम्"[2] इति श्रीविद्यारण्यस्वामिना उक्तं स्पष्टम्, अन्यत्र च कतिपयेषु स्थानेषु अस्य प्रमाणानि उपलभ्यन्ते। यद्यपि चरकसंहितासुश्रुतसंहितयोः न तावत्स्पष्टं प्राप्यते तस्य स्थानविषये तथापि "हृदयं चेतनास्थानम् उक्तं सुश्रुत देहिनाम्"[3] इति सुश्रुतेन चेतनास्थानं हृदयमुक्तम् किन्तु न तन्मनसः स्थानमिति

---

[1] भेलसंहिता, चिकित्सास्थानम् ८-२

[2] पञ्चदशी २-८

[3] सुश्रुतसंहिता, शरीरस्थानम् ४-३४

स्पष्टं कृतम् अथवा तदेव मनः इति वा उक्तम्। किञ्च "प्राणाः प्राणभृतां यत्र श्रिताः सर्वेन्द्रियाणि च। यदुत्तमाङ्गमङ्गानां शिरस्तदभिधीयते" ॥[4] किञ्च कृतः अपि मनसः स्थाननिर्देशः किन्तु यथा भेलाचार्येण तस्य निर्देशः कृतः स किञ्चिद्भिन्नः एव उद्देशः। किञ्च अद्यतनेषु केचन ये मनसः अस्तित्वं तु स्वीकुर्वन्ति किन्तु तत्र तस्य स्थाने भ्रान्ताः सन्ति। उन्मादादीनामपि निरूपणे उपचारे च न सर्वदा सर्वथा स्पष्टता तेषाम् कृतेऽपि बहुसंशोधने किन्तु भेलाचार्यः तत्स्थाधानाधारेण प्रायः सर्वेषामुन्मादानामपस्माराणां च निदानम् उपायांश्च वदति। अतः अत्र भेलाचार्याणां एवमेव अन्येषामाचार्याणां मतानामभ्यासादिमे प्रश्नाः प्राप्ताः –

१) कथं भेलाचार्येण इदमेव मनसः स्थानमिति स्पष्टं कृतम्?

२) किमर्थं मनसः स्थानं भेलाचार्येण तत्र एव निर्दिष्टम्?

३) किमस्ति तत्र मनसः लक्षणस्वरूपस्थानादिषु अन्येषां दार्शनिकायुर्वेदाचार्याणां मतम्?

४) किमस्ति तत्र प्रमाणं येनाधारेण एतदुक्तं तेन?

५) अस्ति वा कथञ्चित्साम्यम् एषाम् आयुर्वेदाद्याचार्याणां मतेषु आधुनिकमानसशास्त्रविदुषां च मतेषु?

६) सुश्रुतादीनां तत्र मनसः स्थानविषये किमर्थं न तावती अधिका स्पष्टता?

७) किं तत्र निर्णेतव्यं स्थानं मनसः?

८) अस्ति वा कश्चिल्लाभः अस्य मनसः स्थाननिरूपणस्य?

एवं प्रकारेण इमे अन्ये च विषयसम्बद्धाः महत्वपूर्णाः प्रश्नाः अस्मिन् संशोधने चिन्त्येरन्। (यथा प्रायः चरकसुश्रुतयोः एव अध्ययने रुचिः दृश्यते प्रवृत्तिश्च किमर्थं भेलादीनामुपेक्षा? किमस्य कारणं सिद्धान्तादिषु अप्रामाण्यं भवेत्? अथवा अन्यैः प्रसिद्धैः चरकादीनां ग्रन्थैः अधिकमेव वैषम्यं भजते अयं ग्रन्थः अतः?)

<u>प्रयोजनम्</u> –

मनसः स्थानाध्ययनव्याजेन उपरिनिर्दिष्टप्रश्नानामुत्तरान्वेषणं तेन हि विभिन्नानां भारतीयानामाचार्याणां मतानां विमर्शः इति मुख्यं प्रयोजनम्। मनसः स्थानं निर्दिश्य भेलाचार्यैः केषाञ्चन उन्मादानां स्थानदोषविशेषाद् आपत्तिः उक्ता अस्ति। प्रक्रियाश्च तेषामुन्मादानाम्। तेषु केचन उन्मादाः तथा प्रक्रियाः अद्यतनमानसशास्त्रेण सादृश्यं भजन्ते। तेषामुन्मादानां भेलाचार्यैः निर्दिष्टस्थाननिश्चयात् किञ्च उन्मादानां कारणानां तेषाञ्च उक्तोपायानामवलम्बने साहाय्यं भवेत् इति लाभः। किञ्च अनेन भारतीयज्ञानपरम्परा तथा आधुनिकज्ञानपरम्परा इत्यनयोः मेलनम् इति एकं प्रयोजनम्।

<u>साधनानि</u> –

---

[4] **चरकसंहिता, सूत्रस्थानम् १७-१२**

अस्य अनुसन्धानस्य कृते मुख्यतया चरकादीनां संहितानामवलम्बः क्रियेत। तत्रापि भेलसंहितायाः प्रामुख्येन अध्ययनम्। दार्शनिकेषु योगादीनां प्राधान्येन विचारः क्रियेत, तत्र हि मनसि महति चर्चा कृतास्ति विद्वद्भिरिति। आधुनिकेषु अस्मिन् विषये यैः कृतम् अध्ययनं विशिष्टं कार्यं वा तदपि विचारार्थं स्वीक्रियेत। अस्य संशोधनस्य कृते "Hermeneutic methodology" इति पद्धत्याः अवलम्बः प्रामुख्येन क्रियेत।

कार्य-योजना –

भेलसंहिता अस्मिन् संशोधनस्य मूले वर्तते अतः तस्याः आदौ गभीराध्ययनम् आवश्यकम्। तस्मादपि प्राक् तस्याः अद्यापि कतिपयः अंशः लुप्तो वर्तते तस्य संशोधनं कर्तव्यमस्ति। तदनन्तरं तदध्ययनं तत्सम्बद्धञ्चान्येषां ग्रन्थानाम्।

*****